॥अथ विसावंत्रप्रयोगप्रारंभः॥

श्रीगणेशायनमः ॥ ॐ अथातः संप्रवक्ष्यामि यंत्रं त्रैलोक्यमोहनं ॥ विंशदंकं महादेवी महासौभाग्यदायकं ॥१॥ सर्वसामर्थ्यजननं वैरीहृदयशोषणं ॥ समस्तमंत्रफलदं महारक्षाकरं सदा ॥ ॥२॥ महद्भाग्येकलभ्यं तन्महदैश्वर्यदायकं ॥ सर्वकल्याणनिलयं दुर्लभं भुवनत्रयं ॥३॥ इंद्राद्याकर्षणं देवि योषिदाकर्षणं परं ॥ आ

कर्षणकरं देवं गंधर्वोरगराक्षसां ॥४॥ मारणं मोहनं देवि क्षोभणं सर्वभूभुजां ॥ करुणामृतकल्लोलवाक्कवित्वप्रकाशकं ॥५॥ भूगतानां निधीनां च मद्यजाकृष्टकारकं ॥ कालसंहारपाशाघ्नं महामोक्षप्रदायकं ॥६॥ वश्यकामेरुदेवेशि सद्योपास्यं प्रयत्नतः ॥ सर्वेषां यंत्रराजानां शिरोमुकुटभूषणं ॥७॥ देवकन्याकृष्टि

प्रयोग॰ ॥१॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

करंकल्पद्रुमदयापरंयोगीशोःपूजितंभद्रेज्ञा
नंवैराग्यभाजिनंज्ञात्वा धनधान्यप्रदंलोकेसू
तराजवश्यंकरंरसायणकरंसिद्धिस्वर्णदाय
कमुत्तमंज्ञात्वाजपतांसर्वपापघ्नंसर्वरोगनिवा
रणंमृत्युस्थानेचवाग्वह्निस्तंभनंभूवश्यंकरं
ज्ञात्वामृत्युप्रदंचामराणामुच्चाटंमद्दतामपि
परसैन्यस्तंभनंचविवादेविजयाभिधं॥

दुर्भिक्षेवृष्टिजनकंकृषिवृष्टिकरंपरंरत्नवृ
ष्टिकरंसर्वमनोरथसमृद्धिदं॥ पौत्रपौत्र
सुखंदेहबलवृद्धिप्रदायकंराज्यवस्तस्यनश्य
तियेनेदंसाध्यतेभुवि॥ व्याधयोविलयं
यांतिसफलान्योषधानिचभूमिःकामदु
घास्तस्यदेशाःस्फीताभवंतिवै॥ क्षेमंते
गवशागास्तस्यसर्वस्तस्यवशंवदंराज्य

देभ्रष्टराज्यानांनिर्धनानांधनप्रदां॥१५॥संमुक्ति
देंसुमुक्षूणामगतीनांगतिप्रदां॥अणिमाम
हिमाचैवगरिमाललघिमातथा॥१६॥प्राप्ति
प्राकाम्यमीशत्वंवशित्वंतत्करेदिशेत्॥व
हुनाकिमिहोक्तेनसर्वसिद्धिप्रदायकं॥१७॥
तस्योद्धारंप्रवक्ष्यामिसमाहितमनाश्रृण॥
तयापिनोहंवाच्यंमेगोप्याद्गोप्यतरंमम॥

नयोग०

॥३॥

॥१८॥हृदयंममसर्वस्वंमद्भाग्यंममप्राणवत्
प्राणादपिप्रियतमंनमकाश्यंत्वयाक्वचित्॥
॥१९॥किंयोगैःपावनैःस्तोत्रैःकिंतपोभिःप
यासकैः॥किंदानैःकिंजपैःस्तोत्रैःकिंपूजा
जागरिस्तरैः॥२०॥किमन्यैःरसनालापैःकि
मन्यैर्देवसंस्तवैःकुशिष्यायनदातव्यंदथा
चेत्सापभाग्भवेत्॥२१॥मीननामचतुर्थी

यमज्ञानेऽविवृत्ताःपूरयेत्प्रथमांपंक्तिंद्वितीयांस
र्वैः पुनरथापाषाणदारकोत्पन्नेतृतीयांप
रिपूरयेत्॥एवंत्रिवर्गपंचोयंभविताभूधरा
त्मजे॥२॥प्रथमंस्थितिसंहारःसंहारश्च
द्वितीयकेकादिसृष्टिस्तृतीयेचएवंमंत्रक्र
मोमतः॥२४॥कामादिक्रममारभ्यनवकोष्ठा
निपूरयेत्॥एकाधिकोनविंशत्याषष्ठिरकाः

प्रकीर्त्तिताः॥२५॥स्थित्यापालयतेलोकान्सृष्ट्या
सृष्टेजगत्त्रयंसंहृत्यासंहरेदंतयंत्रंत्रैलोक्यसुं
दरी॥२६॥येनपूर्वंतुलादीनिमहादानानिषोड
शाद्भानिविविधत्यात्रेतेनलभ्यंनसंशयः॥२७॥
मासेस्मिन्मंचराजेतुलब्धव्यंनावशिष्यतेयथा
पीतेमृतेदेविपातव्यंनावशिष्यते॥२८॥यथाज्ञा
तेज्ञाननत्वेज्ञातव्यंनावशिष्यतेऽथास्यच

प्रयोग॰

॥४॥

विधिंवक्ष्येसर्वकामप्रदंशृणु॥२९॥शुद्धतीर्थेगि
रौरम्येससमेभूतलेपुनः॥नित्येनैमित्तिकेकृ
त्वासर्वसंगविवर्जितः॥३०॥विश्वरूपंतत्हृदये
यंत्रराजंविचिंतयेत्॥मायाबीजांतरीभूतमज्ञा
नेधनदाहकः॥३१॥भावनावशामापन्नोसाक्ष
द्यंत्रमयोभवेत्॥किंतस्ययोगसिध्यावाकाय
क्लेशादिभिःश्रमैः॥३२॥यस्यप्रसन्नोभगवान्

यंत्रराजोज्जनार्हनगतस्यकिंदुर्लभंलोकेस्वर्भूपा
तालमंडले॥३३॥प्रणवंपूर्वमुच्चार्यमायाबीजां
तरीकृतं॥विलिखेद्यंत्रराजानंपुनरंकांकितंशु
भं॥३४॥कुशासनेसमासीनएकचित्तःस्थिरास
नः॥ध्यानादिसंयुतोमौनीनमस्कृत्यगुरुंहृदि
॥३५॥गणेशानंनमस्कृत्यप्रार्थयित्वाप्रजापतिं॥
प्रजापतयेनमस्तेस्तुप्रजापालनतत्परः॥३६॥

प्रसन्नोभवदेवेशियंत्रसिद्धिंप्रयच्छमे॥ येकेचित्र तकुष्मांडाभैरवाभूतनायकाः॥३॥ तेसर्वेवि लयंयांतु प्रजानाथनमोस्तुते॥ प्रयच्छसिद्धिम तुलांयंत्रराजस्यदुर्लभां॥३॥ लब्धसादादहंना थकृतकृत्यपदंव्रजेत्॥ एवंप्रार्थ्यगिरिशंगुरु गणपतिंनमेत्॥३९॥ प्रसन्नचेतास्तुलिखे लेखन्याज्ञातिज्ञातथा॥ ज्ञातिपुष्पैःसमभ्यर्च्य

चंदनालिंगितोनरः॥४७॥ पंदत्तामहेज्ञानि कुष्मागरुसमुद्भवं॥ पुष्पवासिततेलेनदीपं दद्यात्प्रयत्नतः॥४१॥ पश्चिमाभिमुखंदीपंज लेज्ञायनिवेदयेत्॥ भोभोजलेज्ञवरुणसर्व कर्मप्रसाधकः॥४२॥ निर्विघ्नंकुरुमेकार्यंद रविघ्नान्मोस्तुते॥ इतिसंप्रार्थ्यवरुणमष्ट गंधैःसुशोभनैः॥४३॥ विलिखेदेकचित्तेन

यंत्रराजंत्रिवर्गेकं॥लिखनेयंत्रराजस्य भूरिवि
घ्नाभवंतिवै॥४४॥क्वचिच्चटचटाशब्दस्तालं
शब्दःक्वचिद्भवेत्तागानंगंधर्वपत्नीनांनृत्य
मप्सरसामपि॥४५॥मातुःपित्तुर्वापुत्रस्य
दर्शनंश्रीगुरोरपिनानामृगव्यालसर्प्पसिं
हव्याघ्रादिदर्शनं॥४६॥गात्रस्फोटनसो
रभ्यगात्रेगोरवमेवच्चारोदनंदुःखितानांच

महावातोमहाग्नयः॥४७॥पर्वतात्पतनंवृक्ष
भंगोविद्युल्लतागमः॥क्वचिन्मेघायतेभूमिः
समुद्रःप्लावयत्तेमहो॥४८॥क्वचिद्धिमानेप
तंतिक्वचिदावर्त्ततेपुनःक्वचिच्चविकृता
तारोयाचत्तेभूतयोवलिं॥४९॥एवंनानावि
धाविघ्नाभवंतिपरमेश्वरि॥निवापंदुस्तरं
स्तांस्तसमाधायनमः स्थिरं॥५०॥विलि

रवेद्यंत्रराजानंकागलेभूर्जपत्रकेवाश्रीमायाक्र
मबीजानिप्रणवाद्यानिचोद्धरेत्॥५१॥स्वाहां
तोमंत्रराजोयंजपेदेनशुचिस्मितोनास्यध्या
नंनवापूजानन्यासोनचभावना॥५२॥जप्ता
देवप्रसिध्येत्तयंत्रराजस्त्रिवर्गतः॥विलिरव
द्यंत्रराजानंत्रिसहस्रंसपाठतां॥५३॥मन
पासंख्यादेवीचत्वारिंशद्विनंलिखेत्॥

प्रयोग ॥८॥

तावल्लिखेद्यंत्रराजंयावत्संख्यासमाप्यते॥५४॥
पुनर्गोधूमचूर्णेनवेष्टयित्वाजलेक्षिपेत्॥मत्स्य
स्तंभक्ष्यमाणंतंहरुणस्तेनतुष्यति॥५५॥
ब्रह्मचर्यंचरेत्तावद्भूशय्यांमौनपूर्विकां॥गो
धूमचूर्णघटितंतैलपक्वंप्रभक्षयेत्॥५६॥
नघृतंभक्षयेत्तावद्यावद्यंत्रंसमाप्यते॥विघ्ना
न्नगणयेद्विसिद्धिंनैवमकारयेत्॥५७॥

गात्रेरोगान्नगणयेत्पुनर्जन्मविचिंतयेत्तएवंहु
नपुरश्चर्यः साक्षाद्धुल्लमयोभवेत्॥५८॥नवा
ध्यंतेयद्दास्तस्यनरक्षांसिनपन्नगाः॥विषंनि
र्विषतांयातिपानीयममृतंभवेत्॥५९॥पर
सैन्यस्तंभनादिपरकायप्रवेशनंचमंत्रराजेव
शीभूतेकिंनसिध्यतिभूतले॥६०॥खेचरी
मेलनंतस्यभूचरीमेलनंभवेत्तस्मज्ञानेपि

प्रयोग

॥९॥

मृत्योर्यातिमोक्षमार्गंसनातनं॥६१॥वशीभूते
यंत्रराजेप्रयोगेकुशलोभवेत्॥विलिखेद्यंत्ररा
जंभूर्जेकोलालरवर्ण्यरे॥६२॥आकृष्यवामपादे
धृत्वातंवाप्यधोमुखं॥पजपेन्मंत्रराजानंअ
ष्टोत्तरशतंसुधीः॥६३॥अमुकमाकर्षयामि
स्वाहांतेपल्लवंवदेत्॥चक्रवर्त्तिनमयाशुभु
र्त्तेनस्वगृहंयं॥६४॥आनयेत्यहरार्द्धेनभूत

रायक्षराक्षसान्नाग्रहरैकेनदेवेशियाकृशासन
सासनात्ता॥६५॥चालयेन्नात्रसंदेहोवरुणंधन
नायकं॥दिक्पालान्विदिग्गपालान्ग्रहरैकेन
सुव्रत्ता॥६६॥ देवकन्यायक्षकन्याप्सरसांसं
डलानिचा॥ध्रुवमाकर्षयेद्देवियक्षराक्षसान्
॥६७॥तावदेनंलिखेद्यंत्रंयावदाकर्षणंभवेत्ता॥ ॥१०॥
नगराकर्षनंवापीकूपपर्वतसागरान्॥६८॥

वनानिदेवदेवेशिसद्यआकर्षयेन्नरः॥किमन्य
द्देवदेवेशिलोकत्रयमिदंपुनः॥६९॥विपरी
तंकर्त्तुकामोदिवसैकेनसाधयेत्ता॥धनधान्य
गजाश्वादिसेनाद्याकर्षणंभवेत्ता॥७०॥आक
र्षणेवश्यीकारेएकएवविधिर्मतः॥लिखित्वा
यंत्रराजानंग्रहनामंततोलिखेत्ता॥७१॥मनु
नावेष्टितंदेविग्रहनामजपेन्सुधीः॥अग्नौ

प्रतापितेरोगोदाहोभूतादिसंभवः॥७॥दग्धेयं त्रेमहादेविसद्योमृत्युमवाप्नुयात्ताडंडेपिकिमु
तान्योवामलमूत्रधरोनरः॥७॥उच्चाटनंम हादेविशृणुषावहितानघः॥उच्चाटनेमूरुहू
क्कोविहूरवेराक्षसाननः॥७॥ प्राग्ाननोभि हृद्धेतुसर्वेषीशानदिङ्मुखनाकाकपक्षोस्थ
लेखिन्यास्त्रिरेखंयंत्रत्रिवर्गकं॥७॥धत्तू

रसंमिश्रमषीभिःक्रोधमुद्दहन्॥वात्यायां
निक्षिपेयंत्रंसम्यग्ाने विजनेवने॥७॥सद्य
उच्चाटयेत्स्थानान्नराक्षेणापिसुरक्षितं॥
स्तंभनंसंप्रवक्ष्यामिशृणुषैकाग्यचेतसा॥
॥७॥हरिद्रारससंमिश्रैर्लोणैर्यंत्रंतुभूर्य
कैःलिखित्वानिषनेद्वृक्षेसपल्लवमनुस्म
रन्॥७॥उपर्यधःशिलादलायदारवंड

यतेपुनःनदीचवर्षाकालीनांमेघंसिद्धंदुतान्ना
नं॥अथस्यनाम्नांभवेन्मंत्रंततंस्तंभयतेक्षुण
त्॥७॥खगतिंस्तंभयतिचवायुस्तंभयते
पुनःनदीचवर्षाकालीनांमेघंसिद्धंदुता
ग्नानं॥८॥नक्षत्रगतिसंचारंविमानंधुषद्
मपिनाणीस्तंभगतिस्तंभमुत्थानस्तंभनंत
था॥८॥शस्त्रसेनास्तंभनंचशक्तिस्तंभं

प्रयोग ॥१२॥

दिवोकसांबद्धनाकिमिहोक्तेनविलोकींस्त
भयेत्क्षणात्॥८॥अथातःसंप्रवक्ष्यामिहे
षमाश्चर्यकारकं॥उलूकपक्षलेखन्याश्मशा
नेखपरेविलेत्॥८॥यंचंकमलपक्षौत्रा
क्षीसपल्लवमनुंजपेत्॥आक्रम्यवामपाद
नयंत्रयुग्मंहिनामकं॥८॥आइंद्राग्नियमूने
ऋत्यवरुणादिकृतामपि॥मेघौंविनाशये

स्त्रिभंकिमुक्तान्यमहीभुजो॥८५॥ लोपामुद्रा
गस्त्ययोश्चअरुंधतिवसिष्ठयोगौरीवाणीविरं
चोरपियामैत्रीसावित्र्यंत्रजेत्॥८६॥
यक्षराक्षसवेतालगंधर्वोरक्षरक्षसां॥हे
पः स्यान्नात्रसंदेहोस्वभूपातालवासिनां॥
॥८७॥ वश्यकामस्तुदेवेत्रिक्षीरेणसह
भक्षयेत्॥ यस्यनाम्नांयंत्रराजंसवश्यो

ज्ञायतेक्षणात्॥८८॥ नृपोनृपंद्रोगंधर्वोदे
वोदेवांगनाअपि॥वशीभूतावभवंत्याशुस
धकस्यास्यकिंकराः॥८९॥ बहूनांकिमि
होक्तेनमांत्रिमंचवशंनयेत्॥शांतिकामो
लिखित्वामुंयंत्रराजंत्रिवर्गकं॥९०॥ तृप
लुवपुतंयंत्रंपजपेच्चसहस्रकं॥एवंकृते
रोगशांतिःकामक्रोधादिशांतिकं॥९१॥

मनःशांतिर्मोहशांतिः कृत्याद्रोहप्रशांतिकं॥ प्रयोग
कारागृहादिमोक्षश्च दुर्भिक्षादिनिवारणं॥
॥२॥भवेद्देवंनसंदेहोत्रैलोक्यशांतिकं
मनाग्प्रयोगषट्कंदेवेशिमोक्तमित्थंवरानने
॥३॥ कल्पनादेवतस्याश्चसर्वसिद्धिर्भवे
द्यैस्तैः॥त्यक्तासर्वफलासंगंज्ञानवैराग्यभा ॥१४॥
जनं॥४॥नास्यमोहंप्रजनयेद्विभूतिःसर्व

संपदा॥ऋणिमाद्यष्टसिध्यर्थंनमोहंजनयंति
वेगा॥५॥नतस्यकामक्रोधादिमोहादीनां
चसंभवः॥देवैरपिससेव्यःस्यात्किमुतान्यै
र्नराधिपैः॥॥६॥अनेकजन्मपुण्येनयं
त्रमेनंशुचिस्मिते॥संप्राप्यसाधयेद्यत्नाद्या
वज्जीवंसुखीभवेत्॥॥७॥कर्त्तव्यंसर्वदा
यत्नाज्जीवन्मुक्तिमभीप्सुभिः॥श्रीत्यंतेक

थितंकांतेनमकास्यंकदाचना॥९८॥ मकास्यंयदिचेत्कांतेकमलायतलोचने॥सुवर्णदशकंकृत्वायंत्रराजंप्रदर्शयेत्॥९९॥ अन्यथाकरणात्सिद्धिर्नभविष्यतिशोभने॥मृत्युर्भवतिदेवेशिसत्यंसत्यंनसंशय॥१००॥लिखिमेशिरसिविस्मोर्वक्षस्येवनसंशयः॥लभ्यंमत्कृपयाकिंवाविस्मो

स्तेवानचान्यथा॥१०१॥ इतितेगदितोदेविजीवन्मुक्तिफलक्रमः॥कामनांप्राप्यनिःकामोमोक्षलक्ष्मीसगछति॥१०२॥ इतिश्रीविश्वालय[illegible]अंकतंत्रेविंशदंकंत्रिवर्गयंत्रनिरूपणंनामैकानविंशःपटलः॥



Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिश्रीविसायंत्रप्रयोगः समाप्तः॥